श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ पद्मरागपद्धतिः सप्तदशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ पद्मरागपद्धतिः सप्तदशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम्।
पदैकनियतां तस्य पद्मवासामिवापराम् ॥ 17.1 ॥

अतिवाङ्मनसं विचिन्त्य शौरेः
पदरक्षे ! पदपद्मसौकुमार्यम्।
परिपुष्यसि पद्मरागभासा
पदवीमाहितपल्लवामिव त्वम् ॥ 17.2 ॥

पदपल्लवसङ्गिभिः प्रदीप्तैः
अधिकोल्लासिभिरम्ब ! पद्मरागैः।
अनले शयनं क्वचिन्मुरारेः
अविसंवादयसीव पादुके ! त्वम् ॥ 17.3 ॥

विवृणोति रङ्गपतिरत्नपादुके !
त्वयि पद्मरागमणिपद्धतिः शुभा।
निबिडोरुसङ्कटनपीडनक्षरन्
मधुकैटभक्षतजपङ्कवासनाम् ॥ 17.4 ॥

प्रतियन्ति रङ्गपतिपादुके ! जनाः
तव पद्मरागमणिरश्मिसन्ततिम्।

अभिजग्मुषां त्वदनुभावखण्डितात्
अघसञ्चयाद्विगळितामसृक्छटाम् ॥ **17.5** ॥

पश्यन्ति रङ्गेश्वरपादुके ! त्वां
पौराङ्गनाः स्पर्शितरागबन्धाम्।
शृङ्गारयोनेर्ज्वलनस्य दीप्तैः
अङ्गारजालैरिव पद्मरागैः ॥ **17.6** ॥

अवैमि दोषापगमस्य हेतुं
तमोपहां सम्भृतपद्मरागाम्।
अशेषवन्द्यां मणिपादुके ! त्वां
रङ्गेशसूर्योदयपूर्वसन्ध्याम् ॥ **17.7** ॥

अवाप्य पादावनि ! रङ्गभर्तुः
पादाम्बुजे पल्लवसंस्तराभाम्।
त्वत्पद्मरागद्युतयो भजन्ते
कालानलत्वं कलुषाम्बुधेर्नः ॥ **17.8** ॥

निसर्गसिद्धं मणिपादरक्षे !
देवस्य रङ्गावसथप्रियस्य।
बालार्कवर्णाः पदपद्मरागं
त्वत्पद्मरागाः पुनरुक्तयन्ति ॥ **17.9** ॥

पदेन विश्वं मणिपादरक्षे !
पत्न्या समं पालयतो मुरारेः।
यशःपयोधौ परिकल्पयन्ति
प्रवाळशोभां तव पद्मरागाः ॥ **17.10** ॥

अर्चिष्मती काञ्चनपादरक्षे !
प्रस्तौति ते पाटलरत्नपङ्क्तिः।

रेखारथाङ्गस्य महःप्रपञ्चं
    रङ्गेशपादाम्बुजमध्यभाजः ॥ **17.11** ॥

त्वयैव पादावनि ! शोणरत्नैः
    बालातपं नूनमुदीरयन्त्या ।
पद्मापतेः पादतलप्ररूढं
    रेखाम्बुजं नित्यमभूदनिद्रम् ॥ **17.12** ॥

नित्यं निजालोकपथं गतानां
    श्रेयो दिशन्तीं श्रितपद्मरागाम् ।
महीयसीं माधवपादरक्षे !
    मन्यामहे मङ्गळदेवतां त्वाम् ॥ **17.13** ॥

देवस्य रङ्गरसिकस्य विहारहेतोः
    आत्मानमङ्घ्रिकमले विनिवेद्य पूर्वम् ।
प्रायो निवेदयसि शोणमणिप्रकाशैः
    प्रत्यूषपद्मकलिकां पदरक्षिणि ! त्वम् ॥ **17.14** ॥

प्रत्यङ्मयस्य हविषः प्रणवेन देवि !
    प्रक्षेपणाय परमार्थविदां मुनीनाम् ।
प्राज्यां मुकुन्दचरणावनि ! पद्मरागैः
    पर्यायपावकशिखां भवतीं प्रतीमः ॥ **17.15** ॥

सम्पद्यते तव पदावनि ! पद्मरागैः
    प्रस्थानमाङ्गळिकहोमहुताशनश्रीः ।
क्षीराहुतिर्भवति यत्र विकल्पगङ्गा
    रङ्गेश्वरस्य रुचिरा नखरश्मिधारा ॥ **17.16** ॥

आमुञ्चतामरुणयावकपङ्कलक्ष्मीं
    शोणाश्मनां तव पदावनि ! कान्तियोगात् ।

पद्मासहायपदपद्मनखाः श्रयन्ते
सन्ध्यानुरञ्जितसुधाकरबिम्बशोभाम्॥ **17.17** ॥

स्थाने तवाच्युतपदावनि ! पद्मरागाः
तेजोमयाः प्रशमयन्ति तमो मदीयम्।
चित्रं तदेतदिह यज्जनयन्ति नित्यं
रागात्मकेन महसा रजसो निवृत्तिम्॥ **17.18** ॥

पद्माकरान्तरविकासिनि रङ्गभर्तुः
पीत्वा पदावनि ! मधूनि पदारविन्दे।
शोणोपलद्युतिमयीं सुभगप्रचारां
मन्ये बिभर्षि महतीं मदरागशोभाम्॥ **17.19** ॥

पादावनि ! प्रसृमरस्य कलेर्युगस्य
प्रायेण सम्प्रति निवारयितुं प्रवेशम्।
श्रीरङ्गसीम्नि तव शोणमणिप्रसूतः
प्राकारमग्निमयमारभते प्रकाशः॥ **17.20** ॥

लीलागृहान्तरविहारिणि रङ्गनाथे
लाक्षारसैररुणरत्नमयूखलक्ष्यैः।
प्रायेण रञ्जयति पादसरोजयुग्मं
सैरन्ध्रिकेव भवती मणिपादरक्षे !॥ **17.21** ॥

रङ्गेशितुर्विहरतो मणिपादरक्षे !
रथ्यान्तरे सुमनसः परिकीर्यमाणाः।
त्वत्पद्मरागकिरणच्छुरणाद्व्रजन्ते
सन्ध्यातपान्तरिततारकपङ्क्तिलक्ष्मीम्॥ **17.22** ॥

रङ्गाधिराजपदरक्षिणि ! बिभ्रतस्त्वां
गङ्गातरङ्गविमले गिरिशस्य मौळौ।

संवर्धयन्ति महसा तव पद्मरागाः
शैलात्मजाचरणयावकपङ्कलक्ष्मीम् ॥ **17.23** ॥

शरणमुपगतानां शर्वरीं मोहरूपां
शमयितुमुदयस्थान्मन्महे बालसूर्यान्।
पदसरसिजयोगाद्रङ्गनाथस्य भूयः
परिणमदरुणिम्नः पादुके ! पद्मरागान् ॥ **17.24** ॥

हरिपदरुचिराणां पादुके ! तावकानाम्
अरुणमणिगणानां नूनमर्धेन्दुमौळिः।
प्रणतिसमयलग्नां वासनामेव धत्ते
कळमकणिशकान्तिस्पर्धिनीभिर्जटाभिः ॥ **17.25** ॥

प्रतिविहरणमेते पादुके ! रङ्गभर्तुः
पदकमलसगन्धाः पद्मरागास्त्वदीयाः।
तरुणतपनमैत्रीमुद्वहद्भिर्मयूखैः
स्थलकमलविभूतिं स्थापयन्त्यव्यवस्थाम् ॥ **17.26** ॥

अयमनितरभोगान् रञ्जयन् वीतरागान्
अरुणमणिगणानां तावकानां प्रकाशः।
मधुरिपुपदरक्षे ! मङ्क्षु जाज्वल्यमानः
शलभयति जनानां शाश्वतं पापराशिम् ॥ **17.27** ॥

प्रचुरनिगमगन्धाः पादुके ! रङ्गभर्तुः
पदकमलसमृद्धिं प्रत्यहं भावयन्तः।
दधति शकलयन्तो गाढमन्तस्तमिस्रं
समुचितमरुणत्वं तावकाः पद्मरागाः ॥ **17.28** ॥

लाक्षालक्ष्मीमधररुचके रङ्गिणः पादरक्षे !
वक्त्राम्भोजे मदपरिणतिं पद्मरागद्युतिस्ते।

कर्णोपान्ते किसलयरुचिं देवि ! सेवानतानां
सीमन्ते च त्रिदशसुदृशां सौति सिन्दूरशोभाम् ॥ **17.29** ॥

अरुणमणयस्तवैते हरिपदरागेण लब्धमहिमानः ।
गमयन्ति चरणरक्षे ! द्युमणिगणं ज्योतिरिङ्गणताम् ॥ **17.30** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे पद्मरागपद्धतिः सप्तदशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥